दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते ॥"
इत्युज्ज्वलनीलमणिः ॥

जड़ुलः, पुं, (जटुलः पृषोदरादित्वात् टस्य डत्वम् ।) देहस्थिततिलकः । इति हेमचन्द्रः ॥

जतु, क्ली, (जायते वृक्षादिभ्य इति । जन + "फलिपाटिनमिमनिजनामिति ।" उणां १ । १८ । इति उः तोऽन्तादेशश्च ।) वृक्षनिर्य्यासविशेषः । जौ इति ला इति च भाषा ॥ तत्पर्य्यायः । राक्षा २ लाक्षा ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ।६।२।१२५॥ रक्षा ७ । इति रभसः ॥ कीटजा ८ क्रिमिजा ९ जतुका १० जन्तुका ११ गवाधिका १२ । इति रत्नमाला ॥ जतुकम् १३ यावकः १४ अलक्तकः १५ रक्तः १६ । इति शब्दरत्नावली ॥ पलङ्कषा १७ क्रमिः १८ वरवर्णिनी १९ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४७ । १३ ।
"जिघ्रन् सोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम् ॥")

जतुकं, क्ली, (जतु इव कायतीति । कै + कः ।) हिङ्गु । (जतु एव । स्वार्थे कन् ।) लाक्षा । इति मेदिनी । के, ९१ ॥

जतुका, स्त्री, (जतु इव आकृत्या कायतीति । कै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) जनीनामगन्धद्रव्यम् । इत्यमरटीकायां भरतः ॥ चर्म्मचटिका । इति शब्दरत्नावली ॥ (यथा, वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ।
"जतुकाशकृता तद्वद्गन्धैर्व्वा वस्तरोमभिः ।
अपस्मारहरो लेपो मूत्रसिद्धार्थशिग्रुभिः ॥")
पर्पटी । इति भावप्रकाशः ॥ लताविशेषः । सा तु मालवे प्रसिद्धा । तस्याः पर्य्यायाः । जतुकारी २ जननी ३ चक्रवर्त्तिनी ४ तिर्य्यक्फला ५ निशान्धा ६ बहुपुत्री ७ सुपुत्रिका ८ राजवृक्षा ९ जनेष्टा १० कपिकच्छुफलोपमा ११ रञ्जनी १२ दृष्यवल्ली १३ भ्रमरी १४ लघुवल्लिका १५ विष्णुलिङ्गा १६ लघुरुहा १७ ग्रन्थिपर्णा १८ सुवर्च्चिका १९ तरुवल्ली २० दीर्घफला २१ । अस्या गुणाः । शिशिरत्वम् । तिक्तत्वम् । रक्तपित्तकफदाहतृष्णाविषनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ जन्तुकापि पाठः । निशान्धालघुरुहयोरित्यत्र क्रमेण निशाक्का वृक्षरुहा च पाठः ॥ (लाक्षा । तत्पर्य्याया यथा,—
"कीटजा क्रिमिजा लाक्षा जतुका च गवाधिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

जतुकारी, स्त्री, (जतु करोतीति । जतु + कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ततः स्त्रियां ङीष् ।) जतुकालता । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या जतुकाशब्दे व्याख्याताः ॥)

जतुकृत्, स्त्री, (जतु करोति उत्पादयतीति । कृ + क्विप् । जतोः कृदिति वा ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १५३ ॥ (अस्याः पर्य्याया यथा,—
"पर्पटी रञ्जना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसंस्पर्शा जतुकृच्चक्रवर्त्तिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जतुकृष्णा, स्त्री, (जतु इव कृष्णा ।) पर्पटी । इति भावप्रकाशः ॥

जतुनी, स्त्री, (जतु इव नयति जत्वाकारेण प्रापयति संश्लिष्टद्रव्यमिति । नी + क्विप् । अस्याः संश्लेषात् द्रव्यस्य जतुवद्रूपत्वात्तथात्वम् ।) चर्म्मचटिका । इति त्रिकाण्डशेषः ॥

जतुपुत्त्रकः, पुं, (जतुनिर्म्मितः पुत्त्र इव । इवार्थे कन् ।) पाशकगुटिका । नयः । इति त्रिकाण्डशेषः ॥

जतुमणिः, पुं, क्षुद्ररोगविशेषः । (जडुल इति भाषा ॥) तस्य निदानं यथा,—
"समसुत्सन्नमरुजं मण्डलं कफरक्तजम् ।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिश्च सः ॥"
इति माधवकरः ॥
तच्चिकित्सा यथा—
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

जतुरसः, पुं, (जतुनो रसः ।) अलक्तकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यालक्तकशब्दे ज्ञातव्या ॥)

जतूका, स्त्री, (जतुका निपातनात् दीर्घः ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १५३ ॥ चर्म्मचटी । इति शब्दरत्नावली ॥

जत्रु, क्ली, (जायते बाहुरस्मात् । जन् + "जत्र्वादयश्च ।" उणां ४ । १०२ । इति रुनकारस्य तकारश्च ।) स्कन्धसन्धिः । इत्यमरः । २।६।७८॥ पाखुरा इति भाषा ॥ (यथा, महाभारते । ३ । १७ । २२ ।
"तैः स विद्धो महाबाहुः प्रद्युम्नः समरे स्थितः ।
जत्रुदेशे भृशं वीरो ववासीदद्रथे तदा ॥")

जत्रुकं, क्ली, (जत्रु एव । स्वार्थे कन् ।) जत्रु । इति शब्दरत्नावली ॥

जत्वश्मकं, क्ली, (जतुरूपमश्मकम् ।) शिलाजतु । इति राजनिर्घण्टः ॥

जन, ई म य ङ जनौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) ई, जातः । म, जनयति । य ङ, जायते जन्यते । जनिर्व्वध । प्रादुर्भावे इति शाब्दः । प्रादुर्भावः स्फुटीभावः । प्रकाशे प्रादुराविः स्यादित्यमरः । बीजादङ्कुरो जायते पत्रकाण्डादिभेदेन प्रकाशते इत्यर्थः । प्रादुर्भावोऽसदुत्पत्तिरिति केचित् । घटो जायते । इति दुर्गादासः ॥

जन, श लि र जनौ । इति कविकल्पद्रुमः ॥ (ह्वा-परं-अकं-सेट् ।) श, जनयति । लि, जजन्ति । रवैदिकः । इति दुर्गादासः ॥

जनः, पुं, (जायते इति । जन + अच् ।) लोकः । (यथा, महाभारते । १ । १४९ । ९ ।
"अथ प्रवाते तुमुले निशि सुप्ते जने तथा ।
तदुपादीपयत् भीमः शेते यत्र पुरोचनः ॥")
महर्लोकादूर्द्धलोकः । पामरः । इति मेदिनी । ने, ६ ॥ (असुरविशेषः । जनार्द्दन इति शब्ददर्शनात् ॥)

जनकः, पुं, (जनयतीति । जन + णिच् + ण्वुल् ।) पिता । राजभेदः । स तु मिथिलाधिपतिः । इति मेदिनी । के, ९० ॥ इक्ष्वाकुराजपुत्त्रो निमिर्वशिष्ठं त्यक्त्वा यज्ञं कृतवान् वशिष्ठस्तद्यज्ञस्थानमागत्य राजानं आह्वयामास राजा तदा निद्रित आसीत् । मुनिस्तु क्रोधात् त्वं विदेहो भव इत्युक्त्वा तमभिशशाप । ततः,—
"इष्ट्वा विदेहं राजानमृषयः सर्व्व एव ते ।
तस्य ते याजयामासुर्यावद्दीक्षां मनीषिणः ॥
नरेन्द्रस्यापि तं देहमरक्षन्नृषिपुङ्गवाः ।
वस्त्रैर्माल्यैश्च गन्धैश्च पूज्यमानं मुहुर्मुहुः ॥
अथयोऽपि महात्मानो निमिदेहं ममन्थिरे ।
अरणिन्तस्य देहात्तु मन्थानञ्चापि चक्रिरे ॥
मन्त्रहोमैर्महात्मानः पुत्त्रहेतोर्निमेस्तदा ।
अरण्यां मथ्यमानायां प्रादुर्भूतो यतश्च सः ॥
अतो मिथिरिति ख्यातो जननाज्जनकोऽभवत् ।
विदेहश्चाभवद्यस्मान्महात्मा स महातपाः ॥
तस्माद्विदेहाः प्रोच्यन्ते सर्व्वे तद्वंशजा नृपाः ।
एवं विदेहराजस्तु पूर्व्वको जनकोऽभवत् ॥
मिथिर्नाम महावीर्य्यो येन सा मिथिलाभवत् ॥"
इति रामायणम् ॥
(ऋषिविशेषः । स तु वेदसन्देहभञ्जनग्रन्थस्य प्रणेता । यथा, ब्रह्मवैवर्त्ते । १ । १६ । १९ ।
"चकार जनको योगी वेदसन्देहभञ्जनम् ॥"
शम्बरासुरस्य पुत्त्रविशेषः । यथा, हरिवंशे । १६१ । ४४ ।
"श्रुत्वा तु शम्बराह्वाक्यं सुतास्ते शम्बरस्य ह ।
सन्नद्धा निर्य्ययुर्हृष्टाः प्रद्युम्नवधकाङ्क्षया ॥"
इत्युपक्रम्याह ।
"सेनस्कन्धोऽतिसेनश्च सेनको जनकस्तथा ॥")
उत्पादके, त्रि ॥ (यथा, ब्रह्मवैवर्त्ते ।१।१६।२७।
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ॥")

जनकतनया, स्त्री, (जनकस्य विदेहनृपतेस्तनया ।) सीता । इति रामायणम् ॥ (यथा, मेघदूते ।१।
"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")

जनकनन्दिनी, स्त्री, (जनकस्य नन्दिनी ।) सीता । इति रामायणम् ॥

जनकसुता, स्त्री, (जनकस्य सुता ।) सीता । इति रामायणम् ॥

जनकात्मजा, स्त्री, (जनकस्य आत्मजा ।) सीता । इति शब्दरत्नावली ॥ (यथाह कश्चित् ।
"युष्मत्कृते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि यातु यातु ।
लूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि ॥")

जनकारी, [न्], पुं, (जनान् किरति आच्छादयति स्ववर्णेनेति । कॄ आच्छादने + णिनिः ।) अलक्तकः । इति राजनिर्घण्टः ॥